॥ अथ एकपंचाशततमोऽध्याय: ॥ Chapter-51

वसिष्ठ उवाच

ततो गच्छेन्नृपश्रेष्ठ तीर्थं परमशोभनम् ॥
यत्र पूर्वं सुरेन्द्रेण वरयज्ञ: कृतो भवेत् ॥ १

पुरा हिमवत: पार्श्वे पुत्रार्थे दितिरादरात् ॥
कश्यपस्य मुने: पत्नी तपोयुक्ता बभूव ह ॥ २

विज्ञाय तां तपस्यन्तीमिति चिन्तितवान् हरि:
एकाकी रहसि स्थित्वा हितैषी जगतामिति ॥ ३

इन्द्र उवाच :- मथ्यमाने महाम्भोधौ विष्णुना सह दैवतै: ॥
सर्वाण्यादाय रत्नानि दितै: पुत्रा मया हता: ॥ ४

नूनं तेन विरक्तासौ दिति: पुत्रवधार्दिता ॥
सर्वेषां नो वधार्थाय तपसा पुत्रमिच्छति ॥ ५

शैलराजं ततो गत्वा छिद्रान्वेषी दितेरहम् ॥
आराधनं करिष्यामि समित्कुशजलादिभि: ॥ ६

वसिष्ठ उवाच :- इत्थं विचिन्त्य देवेन्द्रो जगाम तुहिनाचलम् ॥
यत्रैकाग्रमना देवी दितिस्तपसि संस्थिता ॥ ७

-०-०-

१ बी यज्ञवाट:

२ ए स्ततो

संवर्तश्च्यवनो रैभ्यो गौतमोऽत्रि: पराशु: ।।
मार्कण्डेयो जैमिनिश्च बृहदश्वापराशर: ।। १५

जमदग्निर्भरद्वाजस्तथा नारदपर्वतौ ।।
एवं च देवलो व्यास: सत्यधामा सुचारुणि ; १६

एतो चान्ये च बहवो मुनय: संशितव्रता: ।।
वासवं याजयांचक्रुरग्निष्टोमशतेन ह ।। १७

यूपाग्रैराकुलं व्योम यथाशास्त्रमलंकृतै: ।।
सहस्रशो वितानानि विहितानि समन्तत: ।। १८

उच्चैरुत्तम्भितास्तम्भा स्तम्भा हेमरत्न विभूषिता :
प्राकारा दिव्यपुष्पाणां विहिता यागभूमिषु ।। १९

विरेजुर्गगनोत्सगे नक्षत्राणां गणा इव
महामुनिमुखोद्गीत: सामध्वनिरशोभत ।। २०

प्रभाते निद्रया मुक्तैर्हंसैरिव कृतो रव:
हूयते दीयते नित्यं भुज्यते च यदृच्छया ।। २१

-०-

१ बी गीत

मरुत: परिवेष्टारस्तत्र शक्रमखोत्सवे ।।
एवं बहूनि वर्षाणि यागैरिष्ट्वात्र पुरन्दर: ।। २२

संतर्प्य ऋत्विज: कामै: स्नानं त्र्यंबकेऽकरोत् ।। २३
अथ प्रत्यक्षतां प्राप्ता ब्रह्मविष्णुमहेश्वरा: ।। २४

गणै[1]परिवृतं शक्रमिदमूचुरतन्द्रिता: ।।
मघवन्परितुष्टा: स्म: तवानेन हि कर्मणा ।। २५

नास्ति पापं त्वयि विभो दितिगर्भ[2]वधे कृतम्
हतेनैकेन येन स्याद्बहूनां सुखमुत्तमम् ।। २६

कर्तव्यमपि पापं तदित्याहुर्धर्मभाषिणा: ।।
या एतास्तु कृता: शक्र श्रीमालेत्र मखक्रिया: ।। २६

ताभि: पुण्यफलं भूयो भोक्तासि विबुधप्रभो ।।
वरं वरय देवेश यस्ते हृदयसंगत: ।। २७
तव तुष्टा: प्रदास्याम: पश्चात्त्रिदिवमाव्रज ।। २८

-0-

१ बी परिवृता :
२ बी नास्ति पापं त्वयि विभो दितिगर्भवशात्कृतम् ।।

वसिष्ठ उवाच :- इत्युक्तो देवदेवैशैरिन्द्रो राजन्कृतांजलिः ।।
उवाच प्रणतो भूत्वा ब्रह्मविष्णुमहेश्वरान् ।। ३०

इन्द्र उवाच :- वरार्होसि यदि प्रेम्णा प्रभूणां यागबिस्तरैः ।।
इन्द्रवाट इति ख्यातो भूभागोऽयं भवत्विति ।। ३१

देवा ऊचुः एवमस्तु सुरश्रेष्ठ यथा तव मनोगतम् ।।
इन्द्रवाट इति ख्यातो भूभागोयं भविष्यति ।। ३२

श्रीमालमुत्तमं चात्रं सन्निधानात्सदा श्रियः ।। ३३

इन्द्रवाटस्तुतत्रापि कुलदोऽसमो ध्रुवम्
इन्द्रवाटे यजिष्यन्ति ये नरा श्रद्धयान्विता: ।। ३४

तैरिष्टं शतशो यावत्कुलदोत्र[१] भविष्यति ।।
अत्र ये श्रद्धया श्राद्धं करिष्यन्ति नरोत्तमा: ।। ३५

पितरस्तस्य संतुष्टा मोदिष्यन्ते शतं समा: ।। ३६

-०-

इति श्री स्कंदपुराणे श्रीमाल माहात्म्ये
इन्द्रवाट माहात्म्यन्नाम एकपंचाशत्तमोऽध्याय: ।। ५१ ।।

१ बी श्रीमालमुत्त के बाद श्लोक नास्ति